योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०१८

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १
सर्गः २
सर्गः ३
सर्गः ४
सर्गः ५
सर्गः ६
सर्गः ७
सर्गः ८
सर्गः ९
सर्गः १०
सर्गः ११
सर्गः १२
सर्गः १३
सर्गः १४
सर्गः १५
सर्गः १६
सर्गः १७
सर्गः १८
सर्गः १९
सर्गः २०
सर्गः २१
सर्गः २२
सर्गः २३
सर्गः २४
सर्गः २५
सर्गः ६५
सर्गः ६६
सर्गः ६७
सर्गः ६८
सर्गः ६९
सर्गः ७०
सर्गः ७१
सर्गः ७२
सर्गः ७३
सर्गः ७४
सर्गः ७५
सर्गः ७६
सर्गः ७७
सर्गः ७८
सर्गः ७९
सर्गः ८०
सर्गः ८१
सर्गः ८२
सर्गः ८३
सर्गः ८४
सर्गः ८५
सर्गः ८६
सर्गः ८७
सर्गः ८८
सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२
सर्गः ५३
सर्गः ५४
सर्गः ५५
सर्गः ५६
सर्गः ५७
सर्गः ५८
सर्गः ५९
सर्गः ६०
सर्गः ६१
सर्गः ६२
सर्गः ६३
सर्गः ६४
सर्गः ११६
सर्गः ११७
सर्गः ११८
सर्गः ११९
सर्गः १२०
सर्गः १२१
सर्गः १२२
सर्गः १२३
सर्गः १२४
सर्गः १२५
सर्गः १२६
सर्गः १२७
सर्गः १२८

अष्टादशः सर्गः १८

भुशुण्ड उवाच ।

अस्त्यस्मिञ्जगति श्रेष्ठः सर्वनाकनिवासिनाम् ।

देवदेवो हरो नाम देवदेवाभिवन्दितः ।। १

षट्पदश्रेणिनयना यस्योच्चस्तबकस्तनी ।

विलासिनी शरीरार्धे लता चूततरोरिव ।। २

हिमहारसिता यस्य लहरीस्तबकोम्भिता । ।

आवेष्टितजटालूटा गङ्गाकुसुममालिका ।। ३

क्षीरसागरसंभूतः प्रसृतामृतनिर्झरः ।

प्रतिबिम्बकरः श्रीमान्यस्य चूडामणिः शशी ।। ४

अनारतशिरश्चन्द्रप्रस्रवेणामृतीकृतः ।

यस्येन्द्रनीलवत्कालकूटः कण्ठे विभूषणम् ।। ५

धूलिलेखामहावर्तं स्वच्छपावकसंभवम् ।

परमाणुमयं भस्म यस्य ज्ञानजलं सितम् ।। ६

निर्मलानि जितेन्दूनि सृष्टानि घटितानि च ।

यस्यास्थीन्येव रत्नानि देहकान्तमयानि च ।। ७

सुधाकरसुधाधीतं नीलनीरदपल्लवम् ।

तारकाबिन्दुशबलं यस्य चाम्वरमम्बरम् ।। ८

भ्रमच्छिवाङ्गनापक्वमहामांसौदनाकुलम् ।

बहिर्भूतं गृहं यस्य श्मशानं हिमपाण्डुरम् ।। ९

कपालमालाभरणाः पीतरक्तवसासवाः ।

आन्त्रस्रग्दामवलिता बन्धवो यस्य मातरः ।। 6.1.18.१०

प्रस्फुरन्मूर्धमणयश्चरन्तो मसृणाङ्ककाः ।

भुजगा वलया यस्य प्रकचत्कनकत्विषः ।। ११

दृक्पातदग्धशैलेन्द्रं जगत्कवललालसम् ।

भैरवाचरितं यस्य लीलासंत्रासितासुरम् ।। ११

स्वस्थीकृतजगज्जातस्वव्यापारस्थचेतसः ।

यदृच्छया करस्पन्दो यस्यासुरपुरक्षयः ।। १३

एकाग्रमूर्तयः स्नेहरागद्वेषविवर्जिताः ।

स्वशना यस्य ते शैलाः सरसा अपि नीरसाः ।। १४

शिरःखुराः खुरकराः करदन्तमुखोदराः ।

ऋक्षोष्ट्राजाहिवक्त्राश्च प्रमथा यस्य लालकाः ।। १५

तस्य नेत्रत्रयोद्भासिवदनस्यामलप्रभाः ।

यथा गणास्तथैवान्याः परिवारो हि मातरः ।। १६

नृत्यन्ति मातरस्तस्य पुरो भूतगणानताः ।

चतुर्दशविधानन्तभूतजातैकभोजनाः ।। १७

खरोष्ट्राकारवदना रक्तमेदोवसासवाः ।

दिगन्तरविहारिण्यः शरीरावयवस्रजः ।। १८

वसन्तगिरिकूटेषु व्योम्नि लोकान्तरेषु च ।

अवटेषु श्मशानेषु शरीरेषु च देहिनाम् ।। १९

जया च विजया चैव जयन्ती चापराजिता ।

सिद्धा रक्तालम्बुसा च उत्पला चेति देवताः ।। 6.1.18.२०

सर्वासामेव मातॄणामष्टावेतास्तु नायिकाः ।

आसामनुगतास्त्वन्यास्तासामनुगताः पराः ।। २१

तासां मध्ये महार्हाणां मातॄणां मुनिनायक ।

अलम्बुसेति विख्याता माता मानद विद्यते ।। २२

वज्रास्थितुण्डश्चण्डाख्य इन्द्रनीलाचलोपमः ।

तस्यास्तु वाहनं काको वैष्णव्या गरुडो यथा ।। २३

इत्यष्टैश्वर्ययुक्तास्ता मातरो रौद्रचेष्टिताः ।

कदाचिन्मिलिता व्योम्नि सर्वाः केनापि हेतुना ।।२४

उत्सवं परमं चक्रुः परमार्थप्रकाशकम् ।

वामस्रोतोगता एतास्तुम्बुरुं रुद्रमाश्रिताः ।। २५

पूजयित्वा जगत्पूज्यौ देवौ तुम्बुरुभैरवौ ।

विचित्रार्थाः कथाश्चक्रुर्मदिरामदतोषिताः ।। २६

अथेयमाययौ तासां कथावसरतः कथा ।

अस्मानुमापतिर्देवः किं पश्यत्यवहेलया ।। २७

प्रभावं दर्शयामोऽस्य पुनर्नास्मांस्त्वसौ यथा ।

दृष्टमात्रमहाशक्तिः करिष्यत्यवधीरणम् ।। २८

इति निश्चित्य ता देव्यो विवर्णवदनाङ्गिकाम् ।

उमामेव वशीकृत्य प्रोक्षयामासुरादृताः ।। २९

माययापहृतां भर्तुरङ्गाद्रङ्गमुपागताम् ।

तामालोलकचां देव्यः शेपुरोदनतां गताम् ।। 6.1.18.३०

पार्वतीप्रोक्षणदिने तस्मिंस्तत्र महोत्सवः ।

बभूव तासां सर्वासां नृत्यगेयमनोहरः ।। ३१

अत्यानन्दमनुद्दामरवमेवाम्बरं बभौ ।

दीर्घावयवविक्षेपविकासिजघनोदराः ।। ३२

अन्या जहसुरुद्दामतालक्ष्वेडाघनारवम् ।

लसदङ्गविकारं च ध्वनत्सगिरिकाननाः ।। ३३

अन्या जगुर्ध्वनच्छैलग्रहमापानतोषिताः ।

वारीव रववद्रञ्जज्जगन्मण्डलकोटरे ।। ३४

अन्याः पानं पपुः पुष्टचर्चिताङ्गशिरःखुरम् ।

लीलाघुरघुरारावरणदाकाशकोटरे ।। ३५

पपुरुदगुरथोच्चैः सत्वरा जग्मुरूचु-

र्जहसुरपुरहौषुः पेतुरुच्चैर्ववल्गुः ।

ननृतुरनिशमादुः स्वादु मांसं च देव्य-

स्त्रिभुवनमपवृत्तं चक्ररुन्मत्तवृत्ताः ।। ३६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० भु० मातृव्यवहारवर्णनं नामाष्टादशः सर्गः ।। १८ ।।